विशुद्धं, त्रि, विशेषेण शुद्धम्। तत्पर्य्यायः। उज्ज्वलम् २ विमलम् ३ विशदम् ४ वीध्रम् ५ अवदातम् ६ अनाविलम् ७ शुचिः ८। इति हेमचन्द्रः॥ निर्म्मलम्। सत्वम्। इत्यजयपालः॥ षट्चक्रान्तर्गतपञ्चमचक्रम्। तत्तु कण्ठस्थं अकारादिषोड़शस्वरयुक्तधूम्रवर्णषोड़शदलपद्मम्। तन्मध्ये शिव आकाशश्चास्ति। यथा,—

"तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम्।
स्वरैश्च षोड़शैर्युक्तं धूम्रवर्णं महाप्रभम्।
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम्॥"
इति तन्त्रम्॥

अगस्त्यसंहितायाम्। अकारादिषोड़शस्वरान् सबिन्दून् षोड़शदलकमले कण्ठमूले न्यसेत्। विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते। इति तन्त्रसारः॥

विशुद्धिः, स्त्री, (वि+शुध+क्तिन्।) समः। शोधनम्। इति त्रिषः॥

"सर्व्वकर्म्मस्वुपादेया विशुद्धिश्चन्द्रतारयोः॥"
इति ज्योतिषम्॥

विशृङ्खलः, त्रि, शृङ्खलारहितः। (यथा, कथासरित्सागरे। ५। ३।

"अचिन्तयं ततश्चाहं राजा तावद्विशृङ्खलः।
तत्कार्य्यचिन्तयाक्रान्तः स्वधर्म्मो मेऽवसीदति॥")

अबद्धः। विगता शृङ्खला यस्येति बहुव्रीहिनिष्पन्नमिदम्॥

विशेषः, पुं, (वि+शिष+घञ्।) प्रभेदः। (यथा, मनुः। ६। २६।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन॥")

प्रकारः। इति जटाधरः॥ व्यक्तिः। इति हेमचन्द्रः॥ तिलकः। इति हारावली॥ सप्तपदार्थान्तर्गतपदार्थविशेषः। यथा,—

"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम्।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः॥"
इति भाषापरिच्छेदः॥

विशेषं निरूपयति। अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः। अन्तेऽवसाने वर्त्तते इति अन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः। घटपटादीनां द्व्यणुकपर्य्यन्तानां तत्तदवयवभेदात् परस्परभेदः। परमाणूनां भेदको विशेष एव स तु स्वत एव व्यावृत्तः। तेन तत्र विशेषान्तरापेक्षा नास्ति इत्यर्थः। इति सिद्धान्तमुक्तावली॥ * ॥ अलङ्कारप्रभेदः। यथा,—

"विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम्।
गते सूर्य्येऽपि दीपस्थास्तमश्छिन्दन्ति तत्कराः॥१
विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते।
अन्तर्बहिः पुरः पश्चात् सर्व्वदिक्ष्वपि सैव मे॥२
किञ्चिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्च सः।
त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणम्॥"३
इति चन्द्रालोकः॥

(पृथिवी। यथा, भागवते। २। ५। २६।

"विशेषस्तु विकुर्व्वाणादम्भसो गन्धवानभूत्।"

तथाच तत्रैव। ३। ११। ४०।

"विकारैः सहितो युक्तैर्विशेषादिभिरावृतः॥"

अतिशयिते, त्रि। यथा, रघुः। २। १४।

"शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः॥")

विशेषकः, पुं क्ली, (विशेष एव। स्वार्थे कन्।) ललाटकृततिलकः। इत्यमरः॥ (यथा, माघे। ३। ६३।

"विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव॥")

तिलकवृक्षे, पुं। इति राजनिर्घण्टः॥ (क्ली, पद्यविशेषः। स तु त्रिभिः श्लोकैरन्वितश्चेत् तदा भवति। यथा,—

"द्वाभ्यान्तु युग्मकं प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्॥")

विशेषयितरि, त्रि। इति मेदिनी॥

विशेषकच्छेद्यं, क्ली, (विशेषके च्छेद्यम्।) चतुःषष्टिकलान्तर्गतषष्ठकला। इति शैवतन्त्रम्॥ सा तु तिलकेषु नानाविच्छेदरचना। इति दशमस्कन्धीयपञ्चचत्वारिंशाध्यायटीकायां श्रीधरस्वामी।

विशेषगुणः, पुं, (विशेषो गुणः।) बुद्ध्यादिषट्कम्। रूपादिचतुष्टयः। स्नेहः। स्वाभाविकद्रवत्वम्। अदृष्टः। भावना। शब्दः। इति भाषापरिच्छेदः॥

विशेषविधिः, पुं, (विशेषो विधिः।) अल्पविषयकविधिः। यथा,—

"तथा सामान्यकार्य्येभ्यो विशेषकविधिर्ब्बली।
बहवो विषया यस्य स सामान्यविधिर्भवेत्।
अल्पः स्याद्विषयो यस्य स विशेषविधिर्म्मतः॥"
इति दुर्गादासः॥

सामान्यविशेषयोर्मध्ये विशेषविधिर्बलवान्। इति स्मृतिः॥

विशेषणं, क्ली, (विशिष्यतेऽनेनेति। वि+शिष+ल्युट्।) विशेष्यधर्म्मः। स तु गुणादिः। यथा। नीलोत्पलमित्यादि। विशिष्यते सम्बध्यते अनेन। छत्रेण छात्रमद्राक्षीदिति। भेदयति अन्यपदार्थं पृथक् करोति इति भेदकम्। नाम्ना शिवः गोत्रेण गार्ग्यः। विशेषणं दृष्टमेव भेदयति। भेदकन्तु अदृष्टमेव भेदयति। इति विशेषणभेदकयोर्भेदः। इति मुग्धबोधटीकायां दुर्गादासः॥

विशेषव्याप्तिः, स्त्री, (विशेषा असामान्या व्याप्तिः।) व्याप्तिभेदः। तल्लक्षणं यथा। प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभाव-प्रतियोगित्वम्। इति चिन्तामणिः॥

विशेषितं, त्रि, (वि+शिष्+णिच्+क्तः।) भिन्नम्। व्यवच्छिन्नम्। इति जटाधरः॥

विशेषोक्तिः, स्त्री, (विशेषस्योक्तिः।) अलङ्कारभेदः। तल्लक्षणोदाहरणे यथा,—

"कार्य्याजनिर्व्विशेषोक्तिः सति पुष्कलकारणे।
हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि॥"
इति चन्द्रालोकः॥

विशेष्यः, त्रि, (विशिष्यते गुणादिभिरिति। वि+शिष+ण्यत्।) धर्म्मिपदार्थः। स च द्रव्यादिः। विशिष्यते यः। घटपटादिः। भासमानवैशिष्ट्यानुयोगी। अस्य लक्षणं यथा। भासमानवैशिष्ट्यानुयोगित्वं अस्ति च घट इति ज्ञाने घटादौ तत् तत्र हि भासमानवैशिष्ट्यं घटघटत्वयोः सम्बन्धस्तदनुयोगित्वस्य घटादौ सत्त्वात्। अनुयोगित्वमपि स्वरूपसम्बन्धविशेषः प्रतियोगित्वमनुयोगित्वञ्चातिरिक्तपदार्थ इत्येकदेशिनः। इति कणादः॥

विशोकः, पुं, (विगतः शोको यस्मात्।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (शोकाभावः। यथा, भागवते। १। १०। ७।

"उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः।
सुहृदाञ्च विशोकाय स्वसुश्च प्रियकाम्यया॥"

युधिष्ठिरस्यानुचरविशेषः। यथा, महाभारते। २। ३३। ३०।

"इन्द्रसेनो विशोकश्च पुरुश्चार्ज्जुनसारथिः॥")

शोकरहिते, त्रि॥ (यथा, भागवते। २। २६। ३१।

"लोकं परं विरजस्कं विशोकं
यास्यत्ययं भागवतप्रधानः॥"

स्त्री, संप्रज्ञानसमाधेः पूर्व्वकालीना चित्तवृत्तिः। यथा, पातञ्जले। १। ३६।

"विशोका वा ज्योतिष्मती॥")

विशोधनी, स्त्री, (विशोध्यतेऽनयेति। वि+शुध+ल्युट्। ङीष्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

विशोधिनी, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

विशोधिनीबीजं, क्ली, जयपालः। इति केचित्॥

विश्नः, पुं, (विच्छ दीप्तौ+"यजयाचयतविच्छेति।" ३। ३। ९०। इति नङ्।) दीप्तिः। इति सिद्धान्तकौमुदी॥ गतिः। इति मुग्धबोधटीकायां दुर्गादासः॥

विश्रणनं, क्ली, (वि+श्रण+ल्युट्।) दानम्। इति शब्दरत्नावली॥

विश्रब्धः, त्रि, (वि+स्रन्भ+क्तः।) अनुद्भटः। शान्तः। विश्वस्तः॥ (यथा, राजतरङ्गिण्याम्। ८। २१२१।

"विश्रब्धभृत्यः शृङ्गारनामा चाप्यब्रवीत् प्रभोः।
तं दृष्टवांस्तृतीयेऽह्नि शयनेऽवगतं स्थितम्॥")

अत्यर्थः। इति हेमचन्द्रः॥ गाढ़ः। इति मेदिनी॥ (निर्व्विशङ्कः। यथा, रामायणे। २। १६। ५।

"नियुज्यमानो विश्रब्धः किं न कुर्य्यामहं प्रियम्॥")

विश्रब्धनवोढ़ा, स्त्री, (विश्रब्धा विश्वस्ता नवोढ़ा।) मुग्धानवोढ़ाभेदः। यथा। स्वीया त्रिविधा मुग्धा मध्या प्रगल्भा च। यथा अङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा। सैव क्रमशो जातप्रश्रया विश्रब्ध-